श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ रेखापद्धतिः सप्तविंशी ॥

*This document*[*] *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ रेखापद्धतिः सप्तविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सूचयन्तीं स्वरेखाभिरनालेख्यसरस्वतीम्।
अलेखनीयसौन्दर्यामाश्रये शौरिपादुकाम्॥ २७.१ ॥

मणिमौळिनिघर्षणात् सुराणां वहसे काञ्चनपादुके ! विचित्रम्।
कमलापतिपादपद्मयोगात् अपरं लक्षणमाधिराज्यसारम्॥ २७.२ ॥

अभितो मणिपादुके ! स्फुरन्त्याः तव रेखावितते स्तथाविधायाः।
मुरवैरिपदारविन्दरूढैः अनुकल्पायितमाधिराज्यचिह्नैः॥ २७.३ ॥

रेखया विनमतां दिवौकसां मौळिरत्नमकरीमुखोत्थया।
पादुके ! वहसि नूनमद्भुतं शौरिपादपरिभोगलक्षणम्॥ २७.४ ॥

त्रिदशमकुटरत्नोल्लेखरेखापदेशात्
पिरिणमयसि पुंसां पादुके ! मूर्ध्नि लग्ना।
नरकमथनसेवासंपदं साधयित्री
नियतिविलिखितानां निष्कृतिं दुर्लिपीनाम्॥ २७.५ ॥

पदकमलतलान्तःसंश्रितान्यातपत्र-
ध्वजसरसिजमुख्यान्यैश्वरीलक्षणानि।
अवगमयसि शौरेः पादुके ! मादृशानाम्
उपरि परिणतैः स्वैर्देवि ! रेखाविशेषैः॥ २७.६ ॥

स्नाता पदावनि चिरं परिभुज्य मुक्ता
पादेन रङ्गनृपते शुभलक्षणेन।
रेखान्तरैर्नवनवैरुपशोभसे त्वं
संस्कारचन्दनविलेपनपङ्कलग्नैः॥ २७.७ ॥

भक्त्या मुहुः प्रणमतां त्रिदशेश्वराणां
कोटीरकोटिकषणादुपजायमानैः।
आभाति शौरिचरणादधिकानुभावा
रेखाशतैस्तव पदावनि ! काऽपि रेखा॥ २७.८ ॥

पादावनि ! प्रतिपदं परमस्य पुंसः
पादारविन्दपरिभोगविशेषयोग्या।
स्वाभाविकान् सुभगभक्तिविशेषदृश्यान्
रेखात्मकान् वहसि पत्रलताविशेषान्॥ २७.९ ॥

रेखापदेशतस्त्वं प्रशमयितुं प्रळयाविप्लवाशङ्काम्।
वहसि मधुजित्पदावनि ! मन्ये निगमस्य मातृकालेख्यम्॥ २७.१० ॥

॥ इति श्रीपादुकासहस्रे रेखापद्धतिः सप्तविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥